CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 945

Title Śankhāyana Vāstu
Paddhati

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 945 Subject: Vedic Rit.

Title: Śāṅkhāyana Vāstupaddhati

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9·6" by 4·5" Extent: 19 foll.

Language: Sanskrit Script: Devanagari

Remarks: —

॥शांखायवास्तु॥ ॥प्रथमःखंडः॥१॥ ॥अगारंकारयिष्यन्निहा
१ न्नाद्यायविशःपरिगृह्णामीत्युक्तैदुंबरशाखयात्रिःपरिलिख्यमध्ये
स्थंडिलेजुहोति॥गृहस्थअगारंगृहंकारयिष्यन्उदुंबरशाखया
इहान्नाद्यायेत्यनेनमंत्रेणतांगृहभूमिंत्रिःपरिलिख्यसर्वतउल्ले
खनेनशोधयित्वातस्याभूम्यामध्येस्थंडिलंचतुरस्रंचतुर्विंशत्यं
गुलंसंपाद्यतत्रवक्ष्यमाणप्रकारेणजुहोति॥भूशुद्धिर्मार्जना
द्दाहात्कालाद्गोक्रमणादपि॥सेकादुल्लेखनाल्लोपाद्गृहंमार्जनले १

पनादिति॥याज्ञवल्क्यः॥गृहकरणेमासनियमोरत्नमालायां॥
आषाढचैत्राश्वयुजोर्जमाघज्येष्ठेषुचप्रौष्ठपदेषुनूनं॥निके
तनानांघटनंनृपाणांयोगेश्वराचार्यमतेनिषिद्धं॥शोकोधान्यंमृ
तिपशुहतीद्रव्यवृद्धिर्विनाशोयुद्धंभृत्यक्षतिरथधनंश्रीश्चव
ह्नेर्भयंच॥लक्ष्मीप्राप्तिर्भवतिभवनारंभकर्त्तुःक्रमेणचैत्रादी
नांमुनिभिरितिफलंवास्तुशास्त्रोपदिष्टं॥वास्तुशास्त्रे॥चै
त्रेशोकानुकुलःकर्त्तावैशाखेतुधनान्वितः॥ज्येष्ठेगृहीविन

॥२॥

श्येतनश्यंतिपशवः शुचौ॥ श्रावणेधनवृद्धिस्यान्नभस्येनश्यतेगृ
ही॥ कलहश्चाश्विनेमासिभृत्य नश्यंतिकार्त्तिके॥ मार्गशीर्षेध
नप्राप्तिः सहस्येकाम्यसंग्रहः॥ माघेभवेद्वह्निभयंफाल्गुनेश्री
रनुत्तमा॥ नारदः॥ कर्कनक्रहरिकुंभगतेर्केपूर्वपश्चिममुखा
निगृहाणि॥ तौलिमेषवृषवृश्चिकयातेदक्षिणोत्तरमुखानि
चकुर्यात्॥ अन्यथायदिकरोतिदुर्मतिर्व्याधिशोकभयनाशम
श्नुते॥ मीनचापमिथुनागनागतेकारयेन्नगृहमेवभास्करे॥ ॥ ॥२॥

॥लल्लः॥ निचस्थितेदेवगुरौनकुर्याद्विवाहचौलव्रतदीक्षणादी
न्॥ यात्राप्रतिष्ठाखलुवास्तुपूजाधनुस्थितेर्केषगेचतद्वत्॥ वृ
द्धगार्ग्यः॥ मीनेधनुषिसिंहेचस्थितेसप्ततुरंगमे॥ क्षौरमन्नंन
कुर्वीतविवाहंगृहकर्मच॥ वास्तुनिबंधे॥ नचस्थेवक्रसंस्थे
अतिचरगतेबालवृद्धास्तगेवासंन्यासोयज्ञयात्राव्रतनियमवि
धिः कर्णवेधोपिदीक्षा॥ मौंजीबंधोंगनानांपरिणयनविधिर्वा

॥३॥

स्तुदेवप्रतिष्ठावर्ज्यासद्भिः प्रयत्नात्त्रिदशपतिगुरौसिंहराशिस्थिते
च॥ तथा॥ गोदावर्युत्तरतोयावद्भागीरथीतटंचयाम्यं॥ सिंहस्थि
तेदेवगुरौनैवविदध्याद्विवाहादि॥ आदिशब्दाद्वास्तुव्रतबंधादी
नांग्रहणं॥ गंगायाउत्तरेकूलेगोदावर्यास्तुदक्षिणे॥ विवाहादौ
देवगुरुः सिंहस्थोपिनदुष्यति॥ नर्मदापूर्वभागेतुशोणस्योत्त
रदक्षिणे॥ गल्लक्याः पश्चिमेपारेमकरस्थोनदोषकृत्॥ रत्न
मालाया॥ रविणासत्तिरन्येषांग्रहाणामस्तमुच्यते॥ ततोर्वाग्वार्द्ध

॥३॥

कंमौद्याद्दूर्द्ध्वंबालांप्रकीर्त्तितं॥ मौद्यात्पूर्वावस्थायांवार्द्धकंऊर्द्ध्वा
वस्थायांबाल्यं॥ शैशवंप्राक्पंचाहंपश्चाद्दशदिनंस्मृतं॥ प्राग्दि
शिपक्षंवृद्धत्वंपश्चिमायांपंचवासरावृद्धत्वं॥ प्रागुदितेपंचशैश
वं॥ पश्चादुदितेदशदिनंशैशवं॥ एतच्छुक्रस्यगुरोरपिबाल्यंवृ
द्धत्वंच॥ तत्रैवोक्तं॥ शैशवंवार्द्धकंपक्षंप्राक्पश्चाच्चबृहस्पतेः
॥ प्रागुद्गतः शिशुरहस्त्रितयंसितस्यात्पश्चाद्दशाहमथपंचदि
नानिवृद्धः॥ प्राच्यांतुपक्षममरेंद्रगुरुस्तुपक्षंप्रागप्यवागपिवदं

॥४॥

तिवसिष्ठमुख्या॥ इतिग्रंथगौरवान्नबहुलिखितं॥ एवमुक्तप्रकारेणगु
रुशुक्रयोरस्तादन्यतमस्मिन्कालेशुभेपक्षेमासेचगृहारंभंकारयीत
॥छ॥ को॥ सिकस्यासिकायतेग्रामकामोजुहोमिस्वाहा॥ अस्यांदेवा
नामसिभागधेयमितःप्रजाताःपितरःपरेताः॥ विरालजुह्वद्ग्रामका
मोतदेवानांकिंचनांतरेणस्वाहेति॥ संमार्जनाद्याज्यभागांतंकृत्वाको
सीतिद्वाभ्यांमंत्राभ्यांद्वेआज्याहुतीप्रतिश्रुताविधिनाहुत्वाकर्मसमा
प्तिंकुर्यात्॥ जुहोतीत्युक्तेसर्पिःप्रतीयेतेतिन्यायात्॥ अत्राज्यभागः

॥४॥

स्विष्टकृतांविकल्पः॥ नाज्याहुतिषुनित्यावाज्यभागौस्विष्टकृच्चेत्युक्त
त्वात्॥ ततः॥ छ॥ स्थूणागर्त्तान्खानयित्वा॥ स्थूणागर्त्ताःस्थूणार्थं
स्तंभार्थंगर्त्तादरास्तान्पूर्वादिचतसृषुदिक्षुदिशोमध्येचैकंगर्त्तंखा
नयित्वा॥ एवंचतसृषुदिक्षुद्वारशाखानिमित्तंद्वौद्वौगर्त्तौनिखेयो
मध्येचैकोगर्त्तः एवंनवगर्त्तान्खानयित्वाततः॥ छ॥ उदमंथाना
मसिच्य॥ तेषुनवसुगर्त्तेषुउदकमिश्राःसक्तवउदमंथास्तानासि
च्यतेषांआसेचनंकृत्वाततः॥ छ॥ इमांविमिन्वेअमृतस्यशाखांम

धोर्द्वारांप्रतरणींवसूनां॥एनांशिशुःक्रंदत्याकुमारएनाधेनुःक्रंदत्तुनि
त्यवत्सेत्युदंबरशाखांघृतेनाक्तांदक्षिणेद्वार्येगर्त्तेनिदधाति॥द्वारिभ
वैद्वार्यौतयोर्योदक्षिणस्तस्मिन्द्वार्येद्वारिस्थेगर्त्तेइमांविधिन्वइति
मंत्रेणवत्साइत्यंतेनघृतेनाक्तांसिक्तांउदुंबरशाखांपूर्वस्यांदिशिनि
दधातिस्थापयति॥छ॥इमामुछ्रयामिभुवनस्यशाखांमधोर्द्वारांप्रत
रणींवसूनां॥एनांशिशुःक्लंदत्याकुमारएनांधेनुःक्रंदनुपाकवत्से
त्युत्तरः॥इमामुछ्रयामीत्यनेनमंत्रेणवत्साइत्यंतेनपूर्वस्यांदिशिउत्त

रतोद्वितीयेगर्त्तेघृताक्तामौदुंबरींशाखांनिदधाति॥छ॥एवंद्वयोर्द्वि
योर्दक्षिणतःपश्चादुत्तरतश्च॥एवमुक्तप्रकारेणद्वाभ्यांमंत्राभ्यां
यथाक्रमेणदक्षिणतोदक्षिणस्यांदिशिद्वेघृताक्तेउदुंबरशाखेनि
खनति॥एवंपश्चात्पश्चिमायादिशिसमंत्रेद्वेशाखेघृताक्तेनिखन
ति॥एवंउत्तरतउत्तरस्यांदिशिद्वेशाखेसमंत्रकेआदधाति॥एवम
ष्टौशाखाःपूर्वादिक्रमेणनिखेयाः॥छ॥इमामहमस्यवृक्षस्यशा
खांघृतमुक्षंतीममृतेमिनोमि॥एनांशिशुःक्रंदत्याकुमारआस्यंदं

॥६॥

तां धेनवो नित्यवत्सा इति स्थूणाराजमुच्छ्रयति॥ मध्ये वर्त्तमाना स्थूणा
राजः। सकलगृहस्य भारक्षमत्वात्॥ इमामहमित्यनेन मंत्रेण वत्साः
इत्यंतेन तं स्थूणाराजमुच्छ्रयति स्थापयति॥ छ॥ एनं कुमारस्तरु
ण आवत्सो भुवनस्परि॥ एनं परिस्तुतः कुंभ्या आदध्नः कलशैर्ग
मन्॥ द्वितीयः खंडः॥ २॥ इहैव स्थूणे प्रतितिष्ठ ध्रुवा श्वावती गो
मती सीलमावती क्षेमे तिष्ठ घृतमुक्षमाणे हैव तिष्ठ निमित्तानि ति
ल्विला स्थाजिरावती मध्ये पोषस्य तृंपतां मा त्वा प्रापन्नघायवः॥ उ

॥६॥

उपहूता इह गाव उपहूता अजावयः॥ अथो अन्नस्य कीलाल उपहूतो
गृहेषु नः॥ रथंतरे प्रतितिष्ठ वामदेव्ये श्रयस्व बृहति स्तभायेति स्थू
णाराजमभिमृशति॥ एनं कुमार इत्यारभ्य स्तभायेत्यंतेन षलवसा
नयुक्तेन मंत्रेण स्थूणाराजं मध्यस्तंभं अभिमृशति तस्य संमर्श
नं करोति॥ छ॥ संमितस्य स्थूणाः संमृशति॥ संमितस्य सम्यक्
निष्पादितस्य गृहस्य स्थूणाः सर्वाः प्राच्यादिदिक्षु स्थिता वक्ष्यमाणै
र्मंत्रैः संमृशति तासां संस्पर्शनं करोति॥ छ॥ सत्यं च श्रद्धां चेति

पूर्वे॥ सत्संचश्रद्धांचइत्येताभ्यांमंत्राभ्यांपूर्वेवाक्रमेणाभि
मृशेत्॥ छ॥ यज्ञश्यदक्षिणाचेतिदक्षिणे॥ यज्ञश्यदक्षिणाचइत्ये
ताभ्यांमंत्राभ्यांदक्षिणातनेनाग्नावेक्रमेणाभिमृशेत्॥ छ॥ बलंचौजश्च
त्यपरे॥ बलंचओजश्चइत्येताभ्यांमंत्राभ्यांअपरेपश्चिमतनेनाग्नावे
क्रमेणाभिमृशेत्॥ ब्रह्मचक्षत्रंचेत्युत्तरे॥ ब्रह्मचक्षत्रंचइत्येता
भ्यांमंत्राभ्यांउत्तरस्येनाग्नावेक्रमेणाभिमृशेत्॥ छ॥ श्रीस्तूपोधर्मः स्तू
णाराजः॥ अभिमृशेदित्यनुवर्त्तते॥ श्रीस्तूपइत्यनेनस्तूपंवासुम ॥७॥

ध्यमभिमृशेत्॥ धर्मःस्थूणाराजइत्यनेनस्थूणाराजोमध्यस्तंभस्तं
अभिमृशेत्॥ छ॥ अहोरात्रेद्वारफलके॥ अहोरात्रेइत्येताभ्यां
मंत्राभ्यांद्वारफलकेद्वाराणांफलकेअतःकाष्ठंउत्तरकाष्ठंचक्रमे
णाभिमृशेत्॥ अत्राप्यभिमृशेदित्यनुवर्त्तते॥ छ॥ संवत्सरोपिधानं
अभिमृशेदित्यनुवर्त्तते॥ संवत्सरइत्यनेनमंत्रेणापिधानंक
पाटमभिमृशेत्क्रमेण॥ छ॥ उक्षासमुद्रइत्यभ्यक्तमन्नमानंस्तू
पस्याधस्तान्निखनेत्॥ उक्षासमुद्रइत्यनेनाभ्यक्तंघृताक्तंअन्नमा

नंपाषाणंस्तूपस्यस्थूणाराजस्यालवालस्याधस्तान्मूलेनिखनेत्॥ उक्षेत्यस्य
प्रतिरथऋषिः॥ सुपर्णोदेवतात्रिष्टुपुदः॥ उक्षासमुद्रोअरुषः सुपर्णः
ऋ॥१॥ ॥तृतीयःखंडः॥३॥ ॥वास्तोष्पतीयेकर्मणि॥ वास्तोष्पतीये
गृहप्रवेशाख्येकर्मणिविधिंव्याख्यास्यामइतिवाक्यशेषः॥ ठ॥ अग्निंदधा
मिमनसाशिवेनायमस्तुसंगमनोवसूनामानोहिंसीः स्थविरंमाकुमारं
शन्नोभवद्विपदेशंचतुष्पदइतिगृह्यतउपसमाधाय॥ पूर्वनिवासस्थला
त्॥ प्रवेशेनववेश्मनइत्युक्तत्वाद्वद्विश्राद्धंविधाय॥ आवसथ्याग्निमा

मानीयनूतनगृहस्यबाह्यतोग्निः दधामीतिमंत्रेणाग्निमुपसमाधायउ
पस्थाप्यवक्ष्यमाणंकुर्यात्॥ प्राकृतस्याग्निंप्रणयामीतिमंत्रस्यनिरासा
र्थंअग्निंदधामीतिग्रहणं॥ संपूर्णमंत्रस्यकथनंअन्यत्रमंत्रमध्ये
ऊहाकरणज्ञापनार्थंपुनःपठनः॥ ठ॥ प्रागग्रेषुनवेषुकुशेषूदकुंभं
नवंप्रतिष्ठाप्य॥ प्राक्अग्राणियेषांतेषुनवेषुआर्द्रेषुकुशेषुनवंनूतन
मुदकुंभमपांपूर्णंकलशंअग्नेरुत्तरतःप्रतिष्ठाप्य॥ उत्तरतउपाचार
इतिन्यायादुत्तरतःस्थापन॥ ठ॥ अरिष्टाअस्माकंवीरासिचिनोधन

मापरा

मित्यभिमंत्र्य॥ अरिष्टाइत्यारभ्यधननिमित्यंतेनमंत्रेणतमुदक्संस्थमुदकुं
भमनामिकाग्रेणाभिमंत्र्यसंस्पृश्य॥ कर्मप्रदीपे। स्पृशन्ननामिकाग्रेण
क्वचिदालोकयन्नपि॥ अनुमंत्रसदैवमनुमंत्रयेत्॥ छ॥ रथंतरस्यस्तो
त्रियेणपुनरादायंककुष्कारंतिस्रः पूर्वाह्णेजुहोति॥ अभित्वाशूरेत्ये
तस्यद्वृचस्यरथंतरस्तोत्रियंसंज्ञाअभित्वाशूराभित्वापूर्वपीतयइ
तिस्तोत्रियानुरूपौप्रगाथौरथंतरस्येतिसूत्रेसूत्रितं॥ प्रगाथस्तुद्वा
भ्यामृग्भ्यांभवति॥ शौनकः॥ अथप्रगाथाबृहतीसतोबृहत्यौबा

र्हतइति॥ बृहतीपूर्वाककुब्वासतोबृहत्युत्तरातंप्रगाथइत्याचक्षतेइतिसू
त्रे॥ स्तोत्रियस्तुतिसृभिर्ऋग्भिः संतताभिर्मिलित्वाभिर्भवति॥ प्रगाथातिरे
केण॥ प्रगाथस्तुद्वृत्वात्मकत्वाद्विहारेणवृचात्मकस्तोत्रियोभवति
तथासूत्रेसूत्रितंच॥ तृचास्तोत्रियानुरूपाः प्रगाथान्परिहाप्येति॥ वि
हारस्तुएवं॥ पूर्वंबृहतीछंदकामृचमविहृतांउक्त्वा॥ ततस्तस्याश्च
तुर्थंपादंउत्तरस्याः सतोबृहत्याः प्रथमेनपादेनसंधायावस्येत्॥
॥ ततोद्वितीयेपादेवसानंविधेयं॥ एवंद्वितीयाऋक्॥ ततोद्वितीयाया

द्वितीयेन पादेन तृतीयं पादसंधायावसानं विधेयं॥ ततो द्वितीयाश्चतुर्थे
पादेवसानं॥ एवं तृतीया ऋक्॥ एवं विहारेण तिस्रः ऋचो भवंति॥ तथा
च सूत्रे॥ बृहतीं शस्त्वेत्तमं प्रत्यादायोत्तरस्याः प्रथमेनावसाय द्विती
येन प्रणुत्पतं प्रत्यादायतीयेनावसायोत्तमेन प्राणौतितास्तिस्रो भ
वंति॥ बृहती पूर्वोत्तरे ककुभाविति॥ अथ यत् बृहत्या प्रतिपद्यते बा
र्हतो वा एष तपति तदेनं स्वेन रूपेण समर्द्धयति द्वे तिस्रः करोति
पुनरादायं तत्प्रजात्यै रूपमिति श्रुतेः॥ रथंतरस्य स्तोत्रियेणाभि

त्वेत्येतत्प्रगाथलक्षणेन प्रगाथं ककुप् कृत्वा इति ककुप्कारं पुनरादीय
ते तत्पुनराक्षायं विहारोक्तमार्गेण तिस्रऋचः कृत्वा ताभिस्तिसृभिर्ऋ
ग्भिः पूर्वाह्णे आज्याहुतिधर्मेण जुहुयात्॥ पाक्षिकाज्यभागौ स्विष्ट
कृच्च॥ नाज्याहुतिषु नित्यावाज्यभागौ स्विष्टकृच्च इत्युक्तत्वात् य
था॥ अभित्वा०॥ तस्थुषः स्वाहा स्वाहाकारोते हेममंत्राणामिति
सूत्रात्॥ ईशानमिंद्र तस्थुषो नत्वा वा अन्यो दिव्यो न पार्थिवः॥ न जा

तोनजनिष्यतेस्वाहा॥नजातोनजनिष्यतेश्वायंतोमघवन्निंद्रवाजिनः॥गव्यं
तस्यादवामदेस्वाहा॥वसिष्ठऋषिः इंद्रोदेवता॥बृहतीछंदः॥उत्तरयो-
ककुभौ॥विहारधर्मत्वात्॥जुहोतीस्रुक्सर्पिः स्रुतीयेतेतिन्यायादाज्या
हुतयः स्विष्टकृदादिकर्मशेषंसमापनं॥ळ॥वामदेव्यस्यमध्यंदिने
स्तोत्रियेणतिस्तोजुहोतीस्तुवर्त्तते॥वामदेव्यंकयानश्चित्रइतिस्तोत्रि
येणाविद्धतेनमध्यंदिनेमध्याद्धेतिस्त्रआज्याहुतीर्जुहोति॥वामदेव्यं ॥११॥

मैत्रावरुणस्यकयानश्चित्रइतिसूक्तेसूत्रितं॥अत्रतुऋगाथाभावाद्विहा
रेण॥स्तोत्रियत्वात्तिस्रऋचः॥कयानश्चित्रः कयात्वंनइतिस्तोत्रिया
नुरूपावितिसूक्तेसूत्रितत्वात्॥तृचाःस्तोत्रियानुरूपाःऋगाथान्परिहा
प्येतिसूत्रे॥वामदेवऋषिः इंद्रोदेवतागायत्रीछंदोद्वयोः॥अभीषुण
इत्यस्याःपादनिचृद्गायत्री॥कयानश्चित्रआभुवत्॥३॥तस्मिन्नेवा
ग्नौआज्यभागांतंकृत्वाकयानश्चित्रइत्याज्याहुतयस्तिस्रोहुत्वा
स्विष्टकृदादिशेषंकर्मसमापनं॥आज्यभागःस्विष्टकृतोर्विकल्पः
पूर्ववत्॥छ॥बृहतीयरक्षे॥आज्यभागांतंकृत्वा तस्मिन्नेवाग्नौत

तः॥ स्तोत्रियेण पुनरादायं ककुप्कारं तिस्रो जुहोतीत्यनुवर्त्तते॥ अप
राह्णे बृहतः स्तोत्रियेण त्वामिद्वीत्यनेन विहारमार्गेण तिस्रऋचः कृ
त्वा पूर्ववत्॥ आज्याहुतीर्जुहोति॥ त्वामिद्धि हवामहे त्वं ह्येहि चेरव इ
ति बृहत इति॥ सूत्रे सूत्रितं॥ त्वामिद्धि षल्लूनाप्रागाथमिति शौनको
क्तत्वाच्च त्वामिद्धि हवामहे स्वर्वतः स्वाहा॥ त्वां काष्ठा स्वर्वतः स त्वं
नश्चित्र वज्रहस्त धृष्णुया महस्तृवानो अद्रिवः स्वाहा॥ २॥ महस्त
वानो अद्रिवो गामश्वं रथ्यमिंद्र संकिर॥ सत्रा वाजं न जिग्युषे स्वाहा
॥३॥ शयुऋषिः इंद्रो वेदेता बृहती छंदः॥ उत्तरयोः ककुभौ॥ विहार

धर्मत्वात्॥ ततः स्विष्टकृदादिकर्मसमापनं॥ आज्यभागस्विष्टकृतां वि
कल्पः पूर्ववत्॥ छ॥ महाव्याहृतयश्च तस्रो वास्तोष्पत इति तिस्रो मी
वहा वास्तोष्पते वास्तोष्पते ध्रुवा स्थूणासौ विष्टकृती दशमी स्थाली
पाकस्य॥ चरोः रात्रौ एता दशाहुये होतव्याः॥ स्थालीपाकस्येत्युक्त
त्वाद्ग्रहणासादनप्रोक्षणानि भवंति॥ वास्तोष्पते ये जुष्टं गृह्णामि
इति ग्रहणं॥ आसादनप्रोक्षणे तथैव भवतः॥ विकृतित्वात्सप्तद
शसमिधः॥ आज्यभागौ हुत्वा ततश्चतुर्गृहीतधर्मेण नवाहुतयः

स्थालीपाकस्य॥ चतस्रोमहाव्याहृतयोभूरादयः प्रसिद्धाः॥ वास्तोष्प
तेप्रतीतितिस्रः॥ अमीवहेत्येका॥ वास्तोष्पतेध्रुवेत्येक॥ एवंनवा
हुतयः॥ दशमीआहुतिसौविष्टकृती॥ स्विष्टकृतीइयंसौविष्टकृ
ती॥ दशमीग्रहणंसंदेहव्युदासार्थं॥ वास्तोष्पतेप्रतीतिचतसृणां
वसिष्टऋषिः॥ वास्तोष्पतिर्देवतात्रिष्टुप्छंदः॥ अमीवहेत्यंस्यगा
यत्री॥ आद्यागायत्रीत्युक्तत्वाच्छौनकेनवास्तोष्पतेप्रतिजानीह्य
स्मान्ऋ॥३॥ अमीवहावास्तोष्पते॥ इ॥ वास्तोष्पतेध्रुवेत्यस्याइ

रिंबिबिर्ऋषिः॥ वास्तोष्पतिर्देवताबृहतीछंदः॥ वास्तोष्पतेध्रुवा
स्थूणाऋ॥१॥ एकासौविष्टकृती॥ चतस्रोव्याहृतयः॥ एवंमहा
व्याहृतिप्रभृतयोदशाहुतयः॥ एवंपूर्वाह्णमध्याह्नापरात्रिक
र्माणिएकस्मिन्नहनिभिन्नतंत्रकाणिसकृत्प्रतिष्ठितेग्नौकार्या
णि॥ ततः स्विष्टकृत्॥ ततोवास्तुदेवतानांस्थापनप्रकारोवा
स्तुशास्त्रे॥ देवतापंचकंतत्रचत्वारिंशत्समन्वितं॥ पूजयित्वा
यथान्यायंत॥ तागृहमुपाविशेत्॥ एकाशीतिपदंकृत्वारेणु

भिः कनकेनवा॥ पश्चात्पिष्टेननुलिखेत्सूत्रेणालोक्यसर्वतः॥ दशपू
र्वापरारेखादशचैवोत्तरायताः॥ सर्ववास्तुविभागेषुविज्ञेयानव
कानव॥ एकाशीतिपदंकृत्वावास्तुंवित्सर्ववास्तुषुपदस्थान्पूज
येद्देवांस्त्रिंशत्पंचदशैवरुतुः॥ द्वात्रिंशद्वाह्यतःपूजाःपूज्यश्चां
तस्त्रयोदश॥ तत्रमंडलप्रकारः॥ तत्रसमभूमौसुधालिप्तानि
समांतरालानिदशसूत्राणिपातयेत्॥ तथैवदशदक्षिणोत्त
रायतानिततश्चनवकोष्ठकासुनवपङ्क्तिषुसर्वमेकाशीतिप

दंमंडलंसंपद्यते॥ तत्रमध्यमकोष्ठकनवकमुत्सृज्यएकमेवप
दंविदध्यात्॥ तत्पुरःस्थितंचपार्श्वस्थितकोष्ठद्वयाभ्यामेकीकुर्या
त्॥ आग्नेयंत्वकमेव॥ एवंदक्षिणपश्चिमोत्तराणित्रीणित्रीण्येकी
कृत्यकोपोष्वेकैकंपरिशिष्यब्रह्मस्थानस्यपरिधिंनिष्पादयेत्॥ ब्र
ह्मश्चेशानादिकोणेष्वेकैककोष्ठकान्येवचत्वारिपदानिपरिशिष्या
प्राच्यादिदिक्षुकोष्ठकानिश्रेणीभूतानिपंचपंचपदानिविदध्या
त्॥ ततश्चपंचचत्वारिंशत्पदानिनिष्पद्यंते॥ मध्येनवपदस्त्वे

कश्चत्वारस्त्रिपदाः स्मृताः विंशतिस्त्वेकपदिकास्तावंतो द्विपदाः स्मृताः
। एवंप्रतिष्ठितादेवाश्चत्वारिंशच्च पंचच ॥ नामतस्तत्प्रवक्ष्यामिस्थाना
निचनिबोधत ॥ ईशानकोणादिसुरान्पूजयेत्क्रमशोनव ॥ शिखी
चैवाथपर्जन्योजयंतः कुलिशायुधः ॥ सूर्यसत्यौभृशश्चैवआका
शोवायुरेवचा ॥ पूषाचवितथश्चैवबृहक्षत्रयमावुभौ ॥ गंधर्वोभृं
गराजश्चमृगः पितृगणस्तथा ॥ दौवारिकोथसुग्रीवः पुष्पदंतो
जलाधिपः ॥ असुरः शेषयोपैचरोगोहिंर्मुख्यएवच ॥ भल्लाटः

सोमनागैश्चअदितिश्चदितिस्तथा ॥ बहिर्द्वात्रिंशदेतेतु तदंतश्च
तुरःशृणु ॥ आपश्चैवाथसावित्रोजयोरुद्रस्तथैवच ॥ अर्यमा
सविताचैवविवस्वान्विबुधाधिपः ॥ मित्रोथराजयक्ष्माचतथापृ
थ्वीधरः क्रमात् ॥ अष्टमस्त्वापवत्सस्तुपरितोब्रह्मणः स्मृताः ॥
॥ अत्रद्वात्रिंशत्पदेबहिः परिधौप्रथममीशानकोणेशिखिनं
संस्थाप्यप्रदक्षिणक्रमेणपर्जन्यादिदेवान्स्थापयेत् ॥ तदेत
श्चतुरइति ॥ पर्जन्यात्पश्चिमेएककोष्टकेपदेआपः ॥ आका

शात्पश्चिमे सावित्रः॥ दौवारिकात्पूर्वस्मिन्जयः॥ पापात्पूर्वस्मिन्रुद्र इति॥ ब
हिः परिधिरंतश्चतुरो देवान्स्थापयेत्॥ ततो ब्रह्मण इति मध्यपदस्थित
स्य ब्रह्मणः पुरस्तादर्यमणं संस्थाप्य प्रदक्षिणक्रमेणाष्टौ देवान्स्थाप
येत्॥ अथोपसंहरति॥ आपश्चैवापवत्सश्च पर्जन्योग्निर्दितिस्तथा॥ प
दिकानां तु वर्गोयमेवं कोणेष्वशेषतः॥ तन्मध्ये तु बहिर्विंशद्द्विपदास्ते
च सर्वदा॥ अर्यमा च विवस्वांश्चामित्रः पृथ्वीधरस्तथा॥ ब्रह्मणः प
रितो दिक्षु त्रिपदास्ते तु सर्वतः॥ पदिकानामित्यादि॥ अयमेकपदानां

पंचानां देवानां ईशानकोणे वर्गः संपद्यते॥ एवमाग्नेयादिकोणेष्वपि ए
कपदाः पंच पंच देवता भवंति॥ तन्मध्ये बहिरिति कोणमध्ये ब्रह्मा
परिधौ विंशतिर्द्विपदा भवंति॥ अर्यमादयश्चत्वारस्त्रिपदाः॥ मध्ये
ब्रह्मा नवपद इति॥ एवं पंच चत्वारिंशद्देवानां स्थापनं पूजनं च वि
धेयं॥ पंच चत्वारिंशद्देवानां नैवेद्यानि हेमाद्रितो ज्ञेयानि॥ एवं पू
र्वाह्णमध्याह्नापराह्णरात्रिकर्माणि तस्मिन्दिने कर्त्तव्यानि भि
न्नानि॥ यद्येतानि चत्वारि कर्माणि कतंत्रेण क्रियते तदा प्रातर्म

ध्याह्ने सायंवा तदातीतकालानामुत्कर्षेणागतकालानां चापकर्षे
ण प्रायश्चित्तपूर्वकं कार्याणि ॥ ७ ॥ ज्येष्ठं पुत्रमादाय जायां च सह
धान्यः प्रपद्येत ॥ ततः सुदिने नूतनगेहे प्रवेशं कुर्यात् ॥ ज्येष्ठं पु
त्रं आदायाग्रे कृत्वा जायां स्त्रियं चाग्रे कृत्वा सहधान्यो धान्यान्य
न्ननितैः सहितः प्रपद्येत प्रविशेत् ॥ ततो यः कुंभः पूर्वं स्थापि
तो गृहमध्ये संयजमानेन पूर्णो धार्यः ॥ जायया वर्द्धापनपात्रं
नालिकेरकुंकुमश्वेतपुष्पदूर्वासहितं अक्षतयुक्तं च धार्यं

। स्नुषया कुलदीपको धार्यः ॥ कनिष्ठपुत्राभ्रातृादयः शिष्या धान्य
न्नगो महिष्याद्यश्वरथादिकं गृहीत्वा प्रविशंति ॥ एतल्लौकिका
चारान्मंत्रलिंगाच्चानुष्ठानं ॥ सहपशुभिः सहरायस्पोषेण सह
यन्मे किंचास्ति तेनेति मंत्रलिंगं ॥ ततो वक्ष्यमाणमंत्रेण गृ
हं प्रविशेत् ॥ ७ ॥ इंद्रस्य गृहाः शिवा वसुमतो वरूथिनस्तान
हं प्रपद्ये सह जायया सह प्रजया सह पशुभिः सह रायस्पोषे
ण सह यन्मे किंचास्ति तेन ॥ अनेन मंत्रेण नवगृहे प्रविशेद्यजमा

नः॥ ततः प्रतिदैवतं वास्तुदेवतानां द्विजभोजनसंकल्पः॥ सप्तकादि
कर्मसमापनं॥ चतुर्थः खंडः॥ ४॥ शग्मं शमं शिवं शिवं क्षेमाय वः
शांत्यै प्रपद्ये भयन्नो अस्तु ग्रामो मारण्याय परिददातु रिश्वमहा
यमा परिदेहीति ग्रामान्निष्क्रामन्॥ यदि ग्रामाद्ग्रामांतरं गम
नं केनचित्प्रयोजनेन तदा शग्मं शग्ममित्येवमादिकं परिदे
हित्यंतं मंत्रं निष्क्रामणं कुर्वन्जपेत्॥ ७॥ अरण्यं ग्रामाय प
रिददातु महविश्वायमा परिदेहीति ग्रामं प्रविशन्नरिक्तः अ

रिक्तः समित्पुष्पकुशादिसहितो गृहपतिर्यदा प्रयोजनं कृत्वा
पुनर्ग्रामं प्रविशति तदा अरण्यमित्यारभ्य परिदेहि इति ग्रा
मं प्रविशन्प्रवेशनं कुर्वन्जपेत्॥ ७॥ गृहान्नद्रांत्सुमनसः
प्रपद्ये वीरघ्नो वीरतरः सुवीरान्॥ इरां वहंतो घृतमुक्षमाणा
अन्येष्वहं सुमनाः संविशेयमिति सदा प्रवचनीयः॥ गृहान्न
द्रानित्येवमादिकं संविशेयमित्यंतं मंत्रं गृहे प्रविशता गृहिणा सदा

सर्वदाग्रवचनीयः प्रवक्तव्यः॥ एतद्विधानंत्रसंयुज्यविधी
१९ यमानत्वात्साग्निकानांनिरग्निकानामनाहिताग्नीनांभवति
॥ळ॥ पंचमः खंडः॥ ५॥